श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री शतकोटिरामचरितान्तर्गत श्रीमदानन्दरामायणे वाल्मिकीये मनोहरकाण्डे

# ॥ श्रीरामकवचम् ॥

*This document* has been prepared by*

***Sunder Kidāmbi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरामकवचम् ॥

अगस्तिरुवाच

आजानुबाहुमरविन्ददळायताक्ष-
    माजन्मशुद्धरस हास मुखप्रसादम्।
श्यामं गृहीतशरचापमुदाररूपम्
    रामं सराममभिराममनुस्मरामि॥ १ ॥

शृणु वक्ष्याम्यहं सर्वं सुतीक्ष्ण मुनिसत्तम।
श्रीरामकवचं पुण्यं सर्वकाम प्रदायकम्॥ २ ॥

अद्वैतानन्दचैतन्य शुद्धसत्वैकलक्षणः।
बहिरन्तः सुतीक्ष्णात्र रामचन्द्रः प्रकाशते॥ ३ ॥

तत्त्वविद्यार्थिनो नित्यं रमन्ते चित्सुखात्मनि।
इति रामपदेनासौ परब्रह्माभिधीयते॥ ४ ॥

जय रामेति यन्नाम कीर्तयन्नभिवर्णयेत्।
सर्वपापैर्विनिर्मुक्तो याति विष्णोः परं पदम्॥ ५ ॥

श्रीरामेति परं मन्त्रं तदेव परमं पदम्।
तदेव तारकं विद्धि जन्ममृत्युभयापहम्।
श्री रामेति वदन् ब्रह्मभावमाप्नोत्यसम्शयम्॥ ६ ॥

ओं अस्य श्रीरामकवचस्य अगस्त्य ऋषिः।
अनुष्टुप् छन्दः।
सीतालक्ष्मणोपेतः श्रीरामचन्द्रो देवता।
श्री रामचन्द्र प्रसादसिद्ध्यर्थं जपे विनियोगः॥

www.prapatti.com

अथध्यानं प्रवक्ष्यामि सर्वाभीष्ट फलप्रदम्।
नीलजीमूतसङ्काशं विद्युद्वर्णाम्बरावृतम्॥ १॥

कोमलाङ्गं विशालाक्षं युवानमतिसुन्दरम्।
सीतासौमित्रिसहितं जटामकुटधारिणम्॥ २॥

सासितूणधनुर्बाणपाणिं दानवमर्दनम्।
यदा चोरभये राजभये शत्रुभये तथा॥ ३॥

ध्यात्वा रघुपतिं युद्धे कालानलसमप्रभम्।
चीरकृष्णाजिनधरं भस्मोद्धूळितविग्रहम्॥ ४॥

आकर्णाकृष्टसशर कोदण्डभुजमण्डितम्।
रणे रिपून् रावणादीन् तीक्ष्णमार्गणवृष्टिभिः॥ ५॥

संहरन्तं महावीरं उग्रमैन्द्ररथस्थितम्।
लक्ष्मणाद्यैर्महावीरैर्वृतं हनुमदादिभिः॥ ६॥

सुग्रीवाद्यैर्महावीरैः शैलवृक्षकरोद्यतैः।
वेगात्करालहुङ्कारैः भुग्भुक्कारमहारवैः॥ ७॥

नवद्भिः परिवादद्भिः समरे रावणं प्रति।
श्रीराम शत्रुसङ्घान्मे हन मर्दय खादय॥ ८॥

भूतप्रेतपिशाचादीन् श्रीरामाशु विनाशय।
एवं ध्यात्वा जपेद्रामकवचं सिद्धिदायकम्॥ ९॥

सुतीक्ष्ण वज्रकवचं शृणु वक्ष्याम्यहं शुभम्।
श्रीरामः पातु मे मूर्ध्नि पूर्वे च रघुवंशजः॥ १०॥

दक्षिणे मे रघुवरः पश्चिमे पातु पावनः।
उत्तरे मे रघुपतिः भालं दशरथात्मजः॥ ११॥

www.prapatti.com

भ्रुवोर्दूर्वादळश्यामः तयोर्मध्ये जनार्दनः।
श्रोत्रं मे पातु राजेन्द्रो दृशौ राजीवलोचनः॥ १२ ॥

घ्राणं मे पातु राजर्षिः कण्ठं मे जानकीपतिः।
कर्णमूले खरध्वंसी भालं मे रघुवल्लभः॥ १३ ॥

जिह्वां मे वाक्पतिः पातु दन्तवल्यौ रघूत्तमः।
ओष्ठौ श्रीरामचन्द्रो मे मुखं पातु परात्परः॥ १४ ॥

कण्ठं पातु जगद्वन्द्यः स्कन्धौ मे रावणान्तकः।
धनुर्बाणधरः पातु भुजौ मे वालिमर्दनः॥ १५ ॥

सर्वाण्यङ्गुळि पर्वाणि हस्तौ मे राक्षसान्तकः।
वक्षो मे पातु काकुत्स्थः पातु मे हृदयं हरिः॥ १६ ॥

स्तनौ सीतापतिः पातु पार्श्वे मे जगदीश्वरः।
मध्यं मे पातु लक्ष्मीशो नाभिं मे रघुनायकः॥ १७ ॥

कौसल्येयः कटिं पातु पृष्ठं दुर्गतिनाशनः।
गुह्यं पातु हृषीकेशः सक्थिनी सत्यविक्रमः॥ १८ ॥

ऊरू शार्ङ्गधरः पातु जानुनी हनुमत्प्रियः।
जङ्घे पातु जगद्व्यापी पादौ मे ताटिकान्तकः॥ १९ ॥

सर्वाङ्गं पातु मे विष्णुः सर्वसन्धीननामयः।
ज्ञानेन्द्रियाणि प्राणादीन् पातु मे मधुसूदनः॥ २० ॥

पातु श्रीरामभद्रो मे शब्दादीन्विषयानपि।
द्विपदादीनि भूतानि मत्सम्बन्धीनि यानि च॥ २१ ॥

जामदग्न्य महादर्पदळनः पातु तानि मे।
सौमित्रिपूर्वजः पातु वागादीनीन्द्रियाणि च॥ २२ ॥

www.prapatti.com

रोमाङ्कुराण्यशेषाणि पातु सुग्रीवराज्यदः।
वाङ्मनोबुद्ध्यहङ्कारैः ज्ञानाज्ञानकृतानि च॥ २३॥

जन्मान्तर कृतानीह पापानि विविधानि च।
तानि सर्वाणि दग्ध्वाशु हरकोदण्डखण्डनः॥ २४॥

पातु मां सर्वतो रामः शार्ङ्गबाणधरः सदा।
इति श्रीरामचन्द्रस्य कवचं वज्रसम्मितम्॥ २५॥

गुह्यात् गुह्यतमं दिव्यं सुतीक्ष्ण मुनिसत्तमः।
यः पठेत् शृणुयाद्वापि श्रावयेद्वा समाहितः॥ २६॥

स याति परमं स्थानं रामचन्द्र प्रसादतः।
महापातकयुक्तो वा गोघ्नो वा भ्रूणहा तथा॥ २७॥

श्रीरामचन्द्रकवचपठनात् शुद्धिमाप्नुयात्।
ब्रह्महत्यादिभिः पापैः मुच्यते नात्र संशयः॥ २८॥

॥ इति श्रीरामकवचं समाप्तम्॥

www.prapatti.com